# 2025

# M.A. 3rd Semester Examination

# SANSKRIT

## Paper : 305A/C

Full Marks : 50 Time : Two Hours

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

## Paper : 305A

## [Dramaturgy and Poetics]

सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः।

### विभाग – क

1. एक प्रश्नः समाधेयः — 10×1=10

(क) धनञ्जयमतानुसारं नाट्यवस्तुस्वरूपं व्याख्यायताम्।

(ख) दशरूपककारदिशा कार्यलक्षणं प्रदीयताम्। कार्यस्य पञ्चावस्थाः सोदाहरणं प्रतिपादनीयाः।

2. कयोर्द्वयोः टीका कार्या — 5×2=10

(क) भारती वृत्तिः

P.T.O.

(ख) प्रतिमुखसन्धिः

(ग) नृत्तम्

## विभाग - ख

3\. एकः प्रश्नः समाधेयः — 10×1=10

(क) के अभाववादिनः ? तेषां कति विकल्पाः सम्भवन्ति ? तान् प्रस्तूयताम्।

(ख) आनन्दवर्धनाचार्यकृतध्वनेः विभागद्वयस्य स्वरूपं व्याख्यायताम्।

4\. यथेच्छं द्वयोर्व्याख्या कार्या — 5×2=10

(क) प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥

(ख) शब्दार्थ-शासन-ज्ञान-मात्रेणैव न वेद्यते।
वेद्यते स तु काव्यार्थ-तत्त्वज्ञैरेव केवलम्॥

(ग) आलोकार्थी यथा दीपशिखायां यत्नवान् जनः।
तदुपायतया तद्वदर्थे वाच्ये तदादृतः॥

**(Internal Assessment - 10 marks)**

## Paper : 305C

## [Pūrvottaramīmāmsādarśana]

### विभाग - क

1. एकः प्रश्नः समाधेयः — 10×1=10

(क) भाट्टमते किं तावत् प्रत्यक्षलक्षणम्? तत्र इन्द्रियपदेन केषां ग्रहणम्? सन्निकर्षपदेन च कति सन्निकर्षाः तैर्गृहीताः? सन्निकर्षविषये तार्किकैः सह भाट्टानां को मतभेदः स्पष्टीक्रियताम्।

(ख) भाट्टमते किं नाम अनुमानम्? तत्र व्याप्तिर्वा का? — परिष्क्रियताम्।

2. द्वयोर्व्याख्या कार्या — 5×2=10

(क) आचार्यमतपाथोधौ बालानपि निनीषताम्।
भीमतां कोऽपि गोपालपोतः पोत एवास्तु नः॥

(ख) एतावता च वयं फलप्रमाणवादिन इति गीयामहे।

(ग) अविसंवादि विज्ञानं प्रमाणम्।

### विभाग - ख

3. एकः प्रश्नः समाधेयः — 10×1=10

(क) वेदान्तमते कतिविधं प्रमाणम्? कानि च तानि? तेषां मते प्रत्यक्षप्रमाणलक्षणं किम्? तैः कथं नैयायिकाद्यभिमतं प्रत्यक्षलक्षणं खण्डितमालोच्यताम्।

P.T.O.

(ख) वेदान्तपरिभाषादिशा शब्दप्रमाणस्वरूपं निरूप्यताम्।

4. द्वयोर्व्याख्या कार्या — 5×2=10

(क) यदविद्याविलासेन भूतभौतिकसृष्टयः।
तं नौमि परमात्मानं सच्चिदानन्दविग्रहम्॥

(ख) इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।

(ग) सन्निकर्षाणां चैतन्याभिव्यञ्जकवृत्तिजनने विनियोगः। सा च वृत्तिश्चतुर्विधा।

**(Internal Assessment - 10 marks)**